श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये सप्ततितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये सप्ततितमं दशकम् ॥

## सुदर्शनशापमोक्षवर्णनं, शङ्खचूडावधवर्णनं, वृषभासुरवधवर्णनं च

इति त्वयि रसाकुलं रमितवल्लभे वल्लवाः
कदापि पुरमम्बिकाकमितुरम्बिकाकानने।
समेत्य भवता समं निशि निषेव्य दिव्योत्सवं
सुखं सुषुपुरग्रसीद्व्रजपमुग्रनागस्तदा ॥ **70.1** ॥

समुन्मुखमथोल्मुकैरभिहतेऽपि तस्मिन् बला -
दमुञ्चति भवत्पदे न्यपति पाहि पाहीति तैः।
तदा खलु पदा भवान् समुपगम्य पस्पर्श तं
बभौ स च निजां तनुं समुपसाद्य वैद्याधरीम् ॥ **70.2** ॥

सुदर्शनधर प्रभो ननु सुदर्शनाख्योऽस्म्यहं
मुनीन् क्वचिदपाहसं त इह मां व्यधुर्वाहसम्।
भवत्पदसमर्पणादमलतां गतोऽस्मीत्यसौ
स्तुवन् निजपदं ययौ व्रजपदं च गोपा मुदा ॥ **70.3** ॥

कदापि खलु सीरिणा विहरति त्वयि स्त्रीजनै -
र्जहार धनदानुगः स किल शङ्खचूडोऽबलाः।
अतिद्रुतमनुद्रुतस्तमथ मुक्तनारीजनं
रुरोजिथ शिरोमणिं हलभृते च तस्याददाः ॥ **70.4** ॥

दिनेषु स सुहृज्जनैस्सह वनेषु लीलापरं
मनोभवमनोहरं रसितवेणुनादामृतम्।

भवन्तममरीदृशाममृतपारणादायिनं
    विचिन्त्य किमु नालपन् विरहतापिता गोपिकाः ॥ 70.5 ॥

भोजराजभृतकस्त्वथ कश्चित्
    कष्टदुष्टपथदृष्टिररिष्टः।
निष्ठुराकृतिरपष्ठु निनाद -
    स्तिष्ठते स्म भवते वृषरूपी ॥ 70.6 ॥

शाक्वरोऽथ जगतीधृतिहारी
    मूर्तिमेष बृहतीं प्रदधानः।
पङ्क्तिमाशु परिघूर्ण्य पशूनां
    छन्दसां निधिमवाप भवन्तम् ॥ 70.7 ॥

तुङ्गशृङ्गमुखमाश्वभियन्तं
    सङ्गृहय्य रभसादभियं तम्।
भद्ररूपमपि दैत्यमभद्रं
    मर्दयन्नमदयः सुरलोकम् ॥ 70.8 ॥

चित्रमद्य भगवन् वृषघातात्
    सुस्थिराऽजनि वृषस्थितिरुर्व्याम्।
वर्धते च वृषचेतसि भूयान्
    मोद इत्यभिनुतोऽसि सुरैस्त्वम् ॥ 70.9 ॥

औक्षकाणि परिधावत दूरं
    वीक्ष्यतामयमिहोक्षविभेदी।
इत्थमात्तहसितैः सह गोपै -
    र्गेहगस्त्वमव वातपुरेश ॥ 70.10 ॥

॥ इति श्रीमन्नारायणीये सप्ततितमं दशकं समाप्तम् ॥